CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF




[ २ ]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# मेधा

[द्वितीयोऽङ्कः]

सम्पादकः प्रकाशकश्च
भोलानाथः पौडेलः
ठूलाघरग्रामनिवासी

सहायकः
रुक्मनाथः पौडेलः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०४० वैक्रमाब्दो ज्येष्ठः ।

मूल्यम् -अष्टौ रूप्यकाणि ।

मुद्रकः
लुषमुद्रणालयः
बानेश्वरे, काष्ठमण्डपे,
नेपाले ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# मेधा–२

संस्कृतभाषानिबद्धां पत्रिकां प्रकाशयितुं बहोः कलादासीद् अभिलाषः। तदर्थं २०३१ वैक्रमाब्दे श्रीगुरोः नयराजस्य 'राज्ञः पृथ्वीनारायणस्योपदेश' इति लेखो मुद्रितोऽभवत्। आत्मनो दौर्बल्येन तत्कार्यं तथैवावरुद्धम्। तदन्तराले संस्कृतपत्रिकायाः नाम 'मेधा' इति निश्चित्य शासनाधिकारात् प्रकाशनानुमतिं च गृहीतवान्। गतवत्सरेऽस्याः पत्रिकायाः प्रथमोऽङ्कः प्रकाशितोऽभवत्। पुनर्द्वितीयस्याङ्कस्य प्रकाशनाय पूर्णो वत्सरो व्यतीतः।

सम्पादकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# अङ्केऽस्मिन्

१. सुमतितन्त्रोक्तस्य सूर्यसिद्धान्तस्याऽनुयायी
गणकचक्रचूडामणिर् ब्रह्मगुप्तः

*नयराजः पन्तः* १—२६

२. संक्षिप्तायाः काशिकायाः श्चुत्वष्टुत्वप्रकरणम्

*भोलानाथः पौडेलः* २७—४१

२. राज्ञो रणबहादुरस्य द्वे पत्रे

*रुक्मनाथः पौडेलः* ४२—४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# सुमतितन्त्रोक्तस्य सूर्यसिद्धान्तस्याऽनुयायी गणकचक्रचूडामणिर् ब्रह्मगुप्तः

नयराजः पन्तः

९ क पत्रे

कल्याब्द रविभिर्घातं चैत्रादिमाससंयुतं ।
द्विस्थ त्रिंशगुणं कृत्वा भूय ताञ्च द्विधा कृतां ।
पञ्चाब्दिरन्ध्रशक्राप्ता मध्यराशौ विशोधयेत् ।
भाजये स्वादसप्ताङ्कैः तलब्दमधिमार्षकम्
ऊर्द्धराशौ नियोज्यानि त्रिंशघ्नं तिथिसंयुतं
द्विस्थ रुवधन्द्विस्थं लोकाद्रितिथित्र्यम्बकै
फलं मध्ये विहीनां च लोकाभ्रसप्तभिर्हृतम्
फलावमेन पिण्डौणां शुक्रादि द्युगणो मत ॥

अस्य सूत्रस्याङ्क ।

गताब्द गुण १२ चैत्रादिमाससयुत । द्विधा अधरि गुण३० तं भूय द्विधा भाग १४९४५ फल मध्ये शोध्य भाग ९७६ । फला उपरिमराशौ योज्य । गुण३० द्विधा अधरि गुण ११ भूय द्विधा भाग

९ ख पत्रे

१११५७३। फल मध्ये शोध्य भाग ७०३ फल हीन शुक्रादि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



सुमते महातन्त्रे चतुर्थोहर्गण समाप्ता ।।०।।

[२०३५ वैक्रमाब्दे त्रिभुवनविश्वविद्यालयाऽन्तर्गतेन पाठ्यक्रम-विकासकेन्द्रेण पन्तोपनामकस्य नयराजस्य भण्डार्युपनामकस्य देवी-प्रसादस्य पन्तोपनामकस्य दिनेशराजस्य च संपादकत्वे प्रकाशितस्य सुमतितन्त्रस्य १६ पृष्ठाद् उद्धृतोऽयम् अंशः । ]

संशोधितः पाठः

कलेर् युगस्य याताऽब्दा बाहुचन्द्रैः१२ समाहताः ।
चैत्रप्रभृतिभिर् मासैर् अतियातैः समन्विताः ।।
संपद्यन्ते सौरमासा, मासाः सौराऽभिधा अमी ।
द्विष्ठा अधः खत्रि३०हता,भूयस् तेऽपि द्विधा स्थिताः ।।
पञ्चाऽब्धिरन्ध्रशक्रा१४९४५ प्ताः शोध्या मध्यमराशितः ।
ते भाज्याः स्वादसप्ताऽङ्कैर्९७६लब्धाः स्युर् अधिमासकाः।।
एतैर् योज्याः सौरमासाश्, चान्द्रमासगणो भवेत् ।
स खत्रि३०घ्नो व्यतीताभिः शुक्ला।ऽदितिथिभिर् युतः ।।
चान्द्राऽहनिचयः सिध्येच्, चान्द्राऽहनिचयस् त्वसौ ।
द्विष्ठोऽधो रुद्र११निहतो, भूयः सोऽपि द्विधा स्थितः।।
लोकाऽद्रितिथिरुद्रा१११५७३प्तो मध्यराशेर् विशोधितः ।
लोकाऽभ्रसप्तभिर्७०३भक्तः स्युर् अवाप्तास् तिथिक्षयाः।।
एतैर् हीनस् तिथिगणः सावनाऽहर्गणो भवेत् ।
सावनाऽहर्गणे तष्टे सप्तभिर्७ वार आप्यते ।।
शेषे शून्या०दिभिस् तुल्ये वारः शुक्राऽदिको भवेत् ।
परीक्षा घस्रसंघस्य कार्या वारेण धीमता ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



## अत्राऽङ्कव्याख्या ।

कलिगताऽब्दान् बाहुचन्द्रैः१२ (द्वादशभिः) गुणयेद्, गुणनफले वर्तमानस्य वर्षस्य चैत्रा।ऽदिगतमासा योज्याः, सौरमासगणः स्यात् । सौरमासगणं खत्रिभिः३० (त्रिशता) गुणयेत्, प्रथमः स्यात् । प्रथमं पञ्चाऽब्धिरन्ध्रशक्रैः १४९४५ (एकम् अयुतं चत्वारि सहस्राणि नव शतानि पञ्चचत्वारिंशद् अनया संख्यया) भजेद् द्वितीयः स्यात् । प्रथमाद् द्वितीयं शोधयेत् । शेषं स्वादसप्ताऽङ्कैः९७६ (नव शतानि षट्सप्ततिः अनया संख्यया) भजेद् अधिमासा लभ्यन्ते । सौरमासगणेऽधिमासा योज्याः, चान्द्रमासगणः स्यात् । चान्द्रमासगणं खत्रिभिः ३० (त्रिशता) गुणयेद् गुणनफले वर्तमानस्य चान्द्रमासस्य शुक्ला।ऽदिका गततिथयो योज्याः,तिथिगणः स्यात् । तिथिगणं रुद्रैः११ (एकादशभिः) गुणयेत् तृतीयः स्यात् । तृतीयं लोकाऽद्रितिथिरुद्रैः १११५७३ (एकं लक्षम् एकम् अयुतम् एकं सहस्रं पञ्च शतानि त्रिसप्ततिः अनया संख्यया) भजेच् चतुर्थः स्यात् । तृतीयाच् चतुर्थं शोधयेत् । शेषं लोकाऽभ्रसप्तभिः ७०३ (सप्त शतानि त्रीणि अनया संख्यया) भजेद् अवमाऽहा लभ्यन्ते । अवमाऽहैर् ऊनस् तिथिगणः सावनाऽहर्गणो (अहर्गणः) भवति ।

सावनाऽहर्गणं सप्तभिस्७ तक्षणुयात् । शून्य० शेषे शुक्रवारः, एक १ शेषे शनिवारः, इति क्रमेण वारो भवति । वारेणाऽहर्गणपरीक्षा कार्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



कलिगताब्दाः × १२ + वर्तमानस्य वत्सरस्य चैत्रादयो गतचान्द्रमासाः = सौरमासगणः

$$\frac{३०\text{सौरमासगणः} - \frac{३०\text{सौरमासगणः}}{१४९४५}}{९७६} = \text{अधिमासाः}$$

(अत्र पूर्णाऽङ्कलब्धिर् एव ग्राह्या)

सौरमासगणः + अधिमासाः = चान्द्रमासगणः

३०चान्द्रमासगणः + वर्तमानस्य चान्द्रमासस्य शुक्ला।ऽदिका गततिथयः = तिथिगणः

$$\frac{११\text{तिथिगणः} - \frac{११\text{तिथिगणः}}{१११५७३}}{७०३} = \text{अवमाऽहाः}$$

(अत्राऽपि पूर्णाऽङ्कलब्धिर् एव ग्राह्या)

तिथिगणः − अवमाहाः = सावनाऽहर्गणः (अहर्गणः)

अहर्गणपरीक्षा

७) सावनाऽहर्गणः (लब्धिः

———

शेषम्

शेषसंख्याः वाराः

० शुक्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



| शेषसंख्याः | वाराः |
|---|---|
| १ | शनिः |
| २ | आदित्यः |
| ३ | सोमः |
| ४ | मङ्गलः |
| ५ | बुधः |
| ६ | बृहस्पतिः |

अत्रोदाहरणम्

२०३३ वैक्रमाऽब्दे चैत्रकृष्णे (पूर्णान्तमानेन वैशाखकृष्णे)-ऽमावास्यायां गुरावहर्गणः साध्यते ।

वैक्रमाब्दाः =२०३३
—१३५
शकाब्दाः =१८९८

| | | |
|---|---|---|
| युधिष्ठिरसंवत् | = | २००० |
| नन्दसंवत् | = | ८०० |
| चन्द्रगुप्तसंवत | = | १३२ |
| शूद्रकदेवसंवत् | = | २४७ |
| कलियुगाऽब्दैः शकवर्षाऽरम्भं यावद् वर्षाणि | | ३१७९ |

[अत्र संवत्सरविषयको विशेषो विचारो मेधायाः प्रथमेऽङ्के प्रकाशिते पन्तोपनामकस्य दिनेशराजस्य दोलाद्रिस्थस्यांऽशुवर्मा-भिलेखस्य तिथ्यादिकानां पञ्चसिद्धान्तिकानुसारिणी गणना नाम निबन्धे द्रष्टव्यः ।]

अतः १८९८ शकाऽब्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



३१७६
१८६८
कलिगताब्दाः = ५०७७
×१२
६०६२४
गतमासः +०
सौरमासगणः = ६०६२४

६०६२४ सौरमासगणः
×३०
१८२७७२० प्रथमः

१८२७७२० प्रथमः
—१२२ द्वितीयः

६७६) १८२७५६८ (१८७२ अधिमासाः
६७६
८५१५
७८०८
७०७६
६८३२
२४७८
१६५२
५२६

१४६४५) १८२७७२० (१२२ द्वितीयः
१४६४५
३३३२१
२६८६०
३४३२०
२६८६०
४४३०

सौरमासगणः = ६०६२४
अधिमासाः = + १८७२
चान्द्रमासगणः = ६२७६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



६२७६६ चान्द्रमासगणः
× ३०
१८८३८८०
गततिथयः = + २६
तिथिगणः = १८८३६०६
× ११
२०७२२६६६ तृतीयः

२०७२२६६६ तृतीयः
— १८५ चतुर्थः
७०३)२०७२२८१४(२६४७७ अवमाहाः
१४०६
६६६२
६३२७
३३५८
२८१२
५४६१
४६२१
५४०४
४६२१
४८३

१११५७३)२०७२२६६६(१८५ चतुर्थः
१११५७३
६५६५६६
८६२५८४
६३६८५९
५५७८६५
८१९१४

तिथिगणः = १८८३६०६
अवमाहाः = — २६४७७
सावनाऽहर्गणः = १८५४४३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अहर्गणपरीक्षा

७) १८५४४३२(२६४६१८

१४

४५

४२

३४ १३

२८ ७

६४ ६२

६३ ५६

१३ ६ शेषः

षड्मिते शेषे बृहस्पतिर् वारो भवति ।

अतोऽहर्गणः शुद्धः।

अत्रोपपत्तिः

कथितकल्पगतोऽर्कसमागणो
रवि१२गुणो गतमाससमन्वितः ।
खदहनैर्३० गुणितस् तिथिसंयुतः
पृथगतोऽधिकमाससमाहतात् ।।१।।

रविदिना।ऽप्तगताऽधिकमासकैः
कृतदिनैः सहितो द्युगणो विधोः ।
पृथगतः पठिताऽवमसंगुणाद्
विधुदिना।ऽप्तगताऽवमवर्जितः ।।२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



भवति भास्करवासरपूर्वको
दिनगणो रविमध्यमसावनः।
अधिकमासदिनक्षयशेषतो
द्युघटिकाऽधिकमत्र न गृह्यते ॥३॥

(सिद्धान्तशिरोमणौ मध्यमाऽधिकारे ग्रहाऽनयनाऽध्याये)

तथा

कलेर् गताऽब्दैर् अथवा दिनाऽद्यं
पूर्वं यदुक्तं खलु तत् प्रसाध्यम्।
अब्दाऽधिपस् तत्र सिताऽधिकः स्याद्
ध्रुवाश् च युक्ताः कलिवक्त्रखेटैः ॥११॥

(सिद्धान्तशिरोमणौ मध्यमाऽधिकारे प्रत्यब्दशुद्धौ)

एताभ्यां भास्करोक्तिभ्याम् अहर्गणसाधनरीतेर् उपपत्तिः स्फुटीभवति।

अधिमासाऽनयने तथाऽवमदिनसाधने पठितानां संख्यानाम् उपपादनम् अत्र क्रियते।

१० ख पत्रे

आदित्यस्य खशून्याभ्रवेम–

११ क पत्रे

पिण्डबलाहकैः

चन्द्रस्याब्धियुगाग्न्यग्निरूपखैकगुणास्विभिः। ...
भागैर्शून्यखसूर्याद्रिकोषरुद्रगुणार्तुभिः।
तस्य सूत्रस्याङ्क
मानोर्द्युगण गुण१७२८०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



इन्दोर्गुण२३१०१३३४४ ...

सर्वग्रहमध्यमसाधने भागाहार६३११६७१२००।।

(प्रकाशितस्य सुमतितन्त्रस्य १६-२० पृष्टाभ्याम् उद्धृतोऽयम् अंशः।)

संशोधितः पाठः

मध्यमा।ऽनयनं वक्ष्ये सूर्या।ऽदीनां यथाक्रमम् ।।

आदित्यस्य खशून्याऽभ्र-

व्योमपिण्डबलाहकाः १७२८०००।

चन्द्रस्याब्धियुगाऽग्न्यग्नि-

रूपखैकगुणाऽश्विनः २३१०१३३४४।।...

गुणाः प्रोक्ता द्युपिण्डस्य भगणा।ऽदिग्रहा।ऽप्तये।

भाजकः खाऽभ्रसूर्याऽद्रि-

कोषरुद्रगुणर्तवः ६३११६७१२००।।

अत्राऽङ्कव्याख्या

सूयस्य गुणकः

खशून्याऽभ्रव्योमपिण्डबलाहकाः १७२८०००० (एका कोटिः सप्त प्रयुतानि द्वे लक्षे अष्टौ अयुतानि)

चन्द्रस्य गुणकः

अब्धियुगाऽग्न्यग्निरूपखैकगुणाऽश्विनः२३१०१३३४४ (द्वे अर्बुदे तिस्रः कोटयः एकं प्रयुतम् एकम् अयुतं त्रीणि सहस्राणि त्रीणि शतानि चतुश्चत्वारिंशत्) ...

सर्वेषां भाजकः

खाऽभ्रसूर्याऽद्रिकोषरुद्रगुणर्तवः ६३११६७१२०० (षट् पद्मानि त्रीणि अर्बुदानि एका कोटिः एकं प्रयुतं षट् लक्षाणि सप्त अयुतानि एकं सहस्रं द्वे शते)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अस्य भावार्थः

६३११६७१२०० मितेषु सावनदिनेषु सूर्यस्य १७२८०८०० मिता भगणाः, चन्द्रस्य २३१०१३३४४ मिता भगणाः पूर्णा भवन्तीति भवति। अत एषां लघुतमानि रूपाणि साध्यन्ते ।

| | सूर्यभगणाः | चन्द्रभगणाः | सावनदिनानि |
|---|---|---|---|
| २ | १७२८०००० | २३१०१३३४४ | ६३११६७१२०० |
| २ | ८६४०००० | ११५५०६६७२ | ३१५५८३५६००. |
| २ | ४३२०००० | ५७७५३३३६ | १५७७९१७८०० |
| २ | २१६०००० | २८८७६६६८ | ७८८९५८९०० |
| २ | १०८०००० | १४४३८३३४ | ३९४४७९४५० |
| ३ | ५४०००० | ७२१९१६७ | १९७२३९७२५ |
| | १८०००० | २४०६३८९ | ६५७४६५७५ |

एतावता गणितेन ६५७४६५७५ मितेषु सावनदिनेषु सूर्यस्य १८०००० मिता भगणाः, चन्द्रस्य २४०६३८९ मिता भगणाः पूर्णा भवन्तीति सिध्यति।

सूर्यभगणाः = १८०००० × १२

सौरमासाः = २१६०००० (चन्द्रभगणाः = २४०६३८९ − सूर्यभगणाः = १८००००)

चान्द्रमासाः = २२२६३८९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



| | | |
|---|---|---|
| चान्द्रमासाः | = | २२२६३८६ |
| सौरमासाः | = | —२१६०००० |
| अधिमासाः | = | ६६३८६ |
| चान्द्रमासाः | = | २२२६३८६ |
| | | × ३० |
| तिथयः | = | ६६७६१६७० |
| तिथयः | = | ६६७६१६७० |
| सावनदिनानि | = | —६५७४६५७५ |
| अवमाऽहाः | = | १०४५०६५ |

एतावता

वर्षाऽयुते धृतिघ्ने १८०००० <br>
नववसुगुणरसरसाः ६६३८९ स्युरधिमासाः । <br>
सावित्रे शरनवखेन्द्रिया- <br>
र्णवा।ऽशास्१०४५०९५तिथिप्रलयाः ।।१४।।

(पञ्चसिद्धान्तिकायां प्रथमेऽध्याये)

इति वराहमिहिरोक्तिः संगच्छते ।

१ ख पत्रे

सूर्यसिद्धान्तमध्येषु दध्नो घृतमिवोद्धृतं । <br>
नाम्ना तु सुमतितन्त्रं सिद्धान्तस्य समद्भुतं ।

(प्रकाशितस्य सुमतितन्त्रस्य ३ पृष्ठाद् उद्धृतोऽयम् अंशः ।)

संशोधितः पाठः

सुमते सूर्यसिद्धान्ताद् दध्नो घृतमिवोद्धृतः । <br>
सारः सुमतितन्त्रा।ऽख्यः सिद्धान्तोऽयं भविष्यति ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



एतावता वराहमिहिरस्य सुमतितन्त्रस्य च सूर्यसिद्धान्त एक एवेति स्फुटीभवति ।

१८०००० सौरवर्षेषु २१६०००० सौरमासेषु ६४८०००० सौरदिवसेषु ६६३८६ अधिमासाः पतन्ति ।

अतः $\frac{६४८०००००}{६६३८६}$ सौरदिवसेषु एकः अधिमासः पतति ।

६६३८६)६४८०००००(६७६

५६७५०१

५०४६६०

४६४७२३

४०२६७०

३६८३३४

४३३६

अतः $६७६\frac{४३३६}{६६३८६}$ सौरदिवसै एक अधिमासः पतति इति सिध्यति। तेन सौरदिवससंख्यायाम् $६७६\frac{४३३६}{६६३८६}$ अनया संख्यया भक्तायाम् अधिमासा लभ्यन्ते । परं तथा भागाहारक्रिया गौरवाऽन्विता भवतीति लघुर् उपायोऽत्र चिन्त्यते ।

$$\text{अधिमासाः} = \frac{\text{सौरदिवसाः}}{६७६\frac{४३३६}{६६३८६}}$$

अत्र लाघवाय ६७६ मित एव भाजको गृहीतः । लब्धौ विकारो मा भूद् इति भाज्योऽपि लघुः कृतः ।

$$\text{अधिमासाः} = \frac{\text{सौरदिवसाः}}{६७६\frac{४३३६}{६६३८६}} = \frac{\text{सौरदिवसाः} - \text{या}}{६७६}$$

अत्र लाघवाय सौरदिवसाः = सौ इति लिख्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



$$\frac{\text{सौ}}{\frac{४३३६}{६४८०००००}} = \frac{\text{सौ} - \text{या}}{९७६}$$

$$\frac{\text{सौ}}{\frac{६४८०००००}{४३३६}} = \frac{\text{सौ} - \text{या}}{९७६}$$

$$\frac{६६३८९\text{सौ}}{६४८०००००} = \frac{\text{सौ} - \text{या}}{९७६}$$

६६३८९ × ९७६सौ = ६४८०००००सौ — ६४८०००००या

$$\text{या} = \frac{६४८०००००\text{सौ} - ६६३८९ \times ९७६\text{सौ}}{६४८०००००}$$

$$= \frac{४३३६\text{सौ}}{६४८०००००} \qquad = \frac{\text{सौ}}{\frac{६४८०००००}{४३३६}}$$

$$= \frac{\text{सौ}}{\frac{३२४०००००}{२१६८}} \qquad = \frac{\text{सौ}}{\frac{१६२०००००}{१०८४}}$$

$$= \frac{\text{सौ}}{\frac{८१०००००}{५४२}} \qquad = \frac{\text{सौ}}{\frac{४०५००००}{२७१}}$$

$$= \frac{\text{सौ}}{१४९४४\frac{१७६}{२७१}} \qquad = \frac{\text{सौ}}{१४९४५}$$

अर्धाऽधिके रूपं ग्राह्यम् इति नियमात्।

२७१)४०५०००० (१४९४४

२७१

१३४०

१०८४

२५६०

२४३९

१२१०

१०८४

१२६०

१०८४

१७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अतः

$$\text{अधिमासाः} = \frac{\text{सौरदिवसाः} - \frac{\text{सौरदिवसाः}}{१४६४५}}{६७६}$$

$$= \frac{३०\text{सौरमासगणः} - \frac{३०\text{सौरमासगणः}}{१४६४५}}{६७६}$$

अधिमासाऽनयनम् उपपन्नम् ।

६६७६१६७० तिथिषु १०४५०६५ अवमाऽहा भवन्ति ।

अतः $\frac{६६७६१६७०}{१०४५०६५}$ तिथिषु एकः अवमाहः पतति ।

$$\frac{६६७६१६७०}{१०४५०६५} = \frac{१३३५८३३४}{२०६०१९} = \frac{४४५२७७८}{६६७३}$$

$$= ६३ + \frac{१}{१ + \frac{१}{२०}} = ६३ + \frac{१}{\frac{२१}{२०}}$$

$$= ६३ + \frac{२०}{२१} = \frac{७०३}{११}$$

६६७३) ४४५२७७८ (६३
४१८०३८
२७२३६८
२०६०१६
६३३७६) ६६७३ (१
६३३७६
६२६४) ६३३७६ (१०
६२६४
४३६

अत्र

$$६३ + \cfrac{१}{१ + \cfrac{१}{१० + \frac{४३६}{६२६४}}}$$

एतद् रूपं ग्रहीतव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



परम् अस्माभिः

$$६३+\frac{१}{१-\frac{१}{१०}}$$

एतद् रूपं एव गृहीतम् ।

अतोऽत्र किञ्चिद् अन्तरं पतति । तद् अन्तरं मा भूद् इति चिन्त्यते तदर्थं प्रयत्यते च ।

$$\text{अवमदिनानि} = \frac{६६७३ \times \text{तिथयः}}{४४५२७७८}$$

$$= \frac{११(\text{तिथयः}—\text{या})}{७०३}$$

अतः परं लाघवाय तिथयः = ति इति लिख्यते

$$\frac{६६७३\text{ति}}{४४५२७७८} = \frac{११(\text{ति}—\text{या})}{७०३}$$

$$६६७३\text{ति} \times ७०३ = ४४५२७७८ \times ११\text{ति} —११\text{या} \times ४४५२७७८$$

$$\text{या} = \frac{(४४५२७७८ \times ११—६६७३ \times ७०३)\text{ति}}{११ \times ४४५२७७८}$$

$$= \frac{(४८६८०५५८—४८६८०११६)\text{ति}}{४८६८०५५८} = \frac{४३६\text{ति}}{४८६८०५५८}$$

$$\frac{\text{ति}}{\frac{४८६८०५५८}{४३६}} = \frac{\text{ति}}{१११५७३}$$

अर्धाऽल्पे रूपं त्याज्यम् इति नियमात् ।

४४५२७७८
× ११
४८६८०५५८

६६७३
× ७०३
२०६०१६
४८७७११
४८६८०११६

४८६८०५५८
—४८६८०११६
४३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



४३६)४८६८०५५८(१११५७३

| | |
|---|---|
| ४३६ | |
| ५०८ | २५१५ |
| ४३६ | २१९५ |
| ६६० | ३२०५ |
| ४३६ | ३०७३ |
| २५१५ | १३२८ |
| | १३१७ |
| | ११ |

$$\text{अवमदिनानि} = \frac{११(\text{तिथयः}—\text{या})}{७०३}$$

$$= \frac{११\left(\text{तिथयः} — \frac{\text{तिथयः}}{१११५७३}\right)}{७०३}$$

$$= \frac{११\text{तिथयः} — \frac{११\text{तिथयः}}{१११५७३}}{७०३}$$

अवमाहा।ऽनयनं समुपपन्नम् ।

कलियुगा।ऽदौ शुक्रवासरो बभूव। अत्र सुमतितन्त्रे कलियुगा-।ऽदेर् अहर्गणः साधितः। अतोऽहर्गणः शुक्रवारा।ऽदिको भवतीति स्फुटम् ।

सप्तषष्टि६७वर्षो ब्रह्मगुप्तः खण्डखाद्यकं नाम करणं प्रणिनाय। द्वाविंशत्यधिकसप्तशत७२२मितस्य वैक्रमाऽब्दस्य चैत्रशुक्ला।ऽदेः खण्डखाद्यकस्याऽहर्गणः प्रादुर्भवति। अतोऽत्र ७२२मितवैक्रमाऽब्द-स्य चैत्रशुक्ला।ऽदेर् अहर्गणः साध्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



वैक्रमाब्दाः = ७२२
—१३५

शकाब्दाः = ५८७
+३१७६

कलिगताब्दाः = ३७६६
×१२

४५१६२

गतमासः = + ०

सौरमासगणः = ४५१६२
×३०

१३५५७६० प्रथमः

१३५५७६० प्रथमः
— ६० द्वितीयः

६७६)१३५५६७०(१३८६ अधिमासाः
९७६
३७६६
२६२८
८६८७
७८०८
८७६०

१४६४५)१३५५७६०(६० द्वितीयः
१३४५०५
१०७१०
८७६०
८७८४
६

सौरमासगणः = ४५१६२
अधिमासाः = +१३८६
चान्द्रमासगणः = ४६५८१
×३०
१३६७४३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



१३६७४३०

गततिथिः = +०

तिथिगणः = १३६७४३०

×११

१५३७१७३० तृतीयः

१५३७१७३० तृतीयः
—१३७ चतुर्थः

७०३)१५३७१५६३(२१८६५
१४०६

१३११
७०३

६०८५
५६२४

४६१६
४२१८

४०१३
३५१५

४६८

१११५७३)१५३७१७३०(१३७
१११५७३ चतुर्थः

४२१४४३
३३४७१६

८६७२४०
७८१०११

८६२२६

अवमाऽहाः

तिथिगणः = १३६७४३०
अवमाऽहाः = —२१८६५
अहर्गणः = १३७५५६५

७)१३७५५६५(१६६५०६
७

६७ ३५
६३ ३५

४५ ६५
४२ ६३

३५ २

० १ २
शुक्रः शनिः आदित्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अतः ७२२ वैक्रमा।ऽब्दस्य चैत्रशुक्ला।ऽदौ रविवारो बभूव।

एतावता खण्डखाद्यकस्य प्रारम्भे सुमतितन्त्राऽनुसारम् १३७५५६५ अहर्गणो बभूवेति सिध्यति। एतत् प्रमाणान्तरेणाऽपि सिद्धयति।

तद् यथा

सुमतिकरणस्य १९ ख पत्रे

**१३७५५६५ श्वते अंकन सुमूर्त्तिया, अहर्गणस योयाव खण्डखाद्यअहर्गण दयिव जुरों ।। १३७५५६५ श्वते अंकन खण्डखाद्यअहर्गणस तंडाव, सुमूर्त्तिया अहर्गण, दयिव जुरों ।।**

(प्रकाशितस्य सुमतितन्त्रस्य परिशिष्टस्य २१६ पृष्ठाद् उद्धृतोऽयम् अंशः।)

सुमतितन्त्रात् साधिताद् अहर्गणात् १३७५५६५ (एकं प्रयुतं त्रीणि लक्षाणि सप्त अयुतानि पञ्च सहस्राणि पञ्च शतानि पञ्चषष्टिः इयं संख्या) वियोजनीया खण्डखाद्यकात् सधितोऽहर्गणो भवति। खण्डखाद्यकात् सधितेऽहर्गणे १३७५५६५ योजनीया सुमतितन्त्रात् साधितोऽहर्गणः सम्पद्यते। खण्डखाद्यकस्य प्रारम्भदिवसे च तदीयोऽहर्गणः शून्यो भवति। अतः सुमतितन्त्राऽनुसारं खण्डखाद्यकस्य प्रारम्भदिवसे १३७५५६५ परिमितोऽहर्गणो भवतीति स्फुटमेव।

अतः खण्डखाद्यकस्याऽहर्गणसाधनप्रकरणं प्रस्तूयते।

**शाकोऽगवसुशरो५८७नो-**
**र्क१२गुणश् चैत्रा।ऽदिमाससंयुक्तः।**
**त्रिंशद्३०गुणस् तिथियुतः**
**पृथगिषु५सहितो द्विधा भक्तः ।।३।।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



पञ्चोदधिनवमनुभिर् १४९४५
लब्धोनो भाजितः षडगनन्दैः ९७६ ।
लब्धाऽधिमासकदिनैर्
अधिकोऽधो रुद्र११संगुणितः ।।४।।
स्वरनववेद४९७युतोऽधस्
त्र्यगतिथिरुद्रैर् १११५७३ हृतः फलविहीनः ।
त्रिखनग७०३हृतः फलावम-
रात्रोनोऽहर्गणोऽर्काऽदिः ।।५।।

(खण्डखाद्यकस्य तिथ्यधिकाराद् उद्धृतोऽयम् अंशः ।)

अत्राऽङ्कव्याख्या

शकाब्दाः अगवसुशरैः ५८७ (पञ्च शतानि सप्ताशीतिः अनया संख्यया) रहिताः कार्याः, वर्षगणः स्यात् । वर्षगणम् अर्कैः १२ (द्वादशभिः) संगुण्य गुणनफले वर्तमानवर्षस्य चैत्रादयो गतमासा योज्याः सौरमासाः स्युः। सौरमासान् त्रिंशता३० संगुण्य गुणनफले वर्तमानस्य चान्द्रमासस्य गततिथयो योजनीयाः सौरदिवसाः स्युः । सौरदिवसाः इषुभिः ५ (पञ्चभिः) योजनीयाः प्रथमः स्यात् । प्रथमं पञ्चोदधिनवमनुभिः १४९४५ (एकम् अयुतं चत्वारि सहस्राणि नव शतानि पञ्चचत्वारिंशत् अनया संख्यया) भजेद् द्वितीयः स्यात् । प्रथमाद् द्वितीयं शोधयेत् । शेषं षडगनन्दैः ९७६ (नव शतानि षट्सप्ततिः अनया संख्यया) भजेद्, अधिमासा भवन्ति । अधिमासान् त्रिंशता३० संगुण्य गुणनफलं सौरदिवसेषु योजयेत्, तिथिगणः स्यात् । तिथिगणं रुद्रैः ११ (एकादशभिः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



संगुण्य. गुणनफले स्वरनववेदाः ४९७ (चत्वारि शतानि सप्तनवतिः इयं संख्या) योजनीया, तृतीयः स्यात् । तृतीयं व्यगतिथिरुद्रैः १११५७३ (एकं लक्षम् एकं अयुतम् एकं सहस्रं पञ्च शतानि त्रिसप्ततिः अनया संख्यया) भजेच् चतुर्थः स्यात् । तृतीयाच् चतुर्थं शोधयेत् । शेषं त्रिखनगैः ७०३ (सप्त शतानि त्रीणि अनया संख्यया) भजेद् अवमाऽहा लभ्यन्ते । अवमाऽहैर् ऊनस् तिथिगणः सावनाऽहर्गणो भवति ।

सावनाऽहर्गणं सप्तभिस् तक्षणुयात् शून्य०शेषे रविवारः, एक १ शेषे सोमवारः, इति क्रमेण वारः स्यात् ।

शकसंवत्सरः— ५८७ = वर्षगणः

वर्षगणः × १२ + वर्तमानस्य वर्षस्य चैत्रा।ऽदयो गतचान्द्रमासाः = सौरमासगणः

सौरमासगणः × ३० + वर्तमानस्य चान्द्रमासस्य शुक्ला-।ऽदिका गततिथयः = सौरदिवसगणः

$$\frac{\text{सौरदिवसगणः} + ५ - \frac{\text{सौरदिवसगणः} + ५}{१४९४५}}{९७६}$$

= अधिमासाः

सौरदिवसगणः + ३० × अधिमासाः = तिथिगणः

$$\frac{\text{तिथिगणः} + ४९७ - \frac{\text{तिथिगणः} + ४९७}{१११५७३}}{७०३}$$

= अवमाऽहाः

तिथिगणः — अवमाऽहाः = सावनाऽहर्गणः (अहर्गणः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



७) सावनाऽहर्गणः (लब्धिः

| शेषम्<br>शेषसंख्याः | वाराः |
|---|---|
| ० | आदित्यः |
| १ | सोमः |
| २ | मङ्गलः |
| ३ | बुधः |
| ४ | बृहस्पतिः |
| ५ | शुक्रः |
| ६ | शनैश्चरः |

अत्रोदाहरणम्

२०३३ वैक्रमाऽब्दे चैत्रकृष्णे (पूर्णान्तमानेन-वैशाखकृष्णे)-ऽमावास्यायां गुरावहर्गणः साध्यते ।

| | | |
|---|---|---|
| वैक्रमाब्दाः | = | २०३३ |
| | | —१३५ |
| शकाब्दाः | = | १८९८ |
| | | —५८७ |
| वर्षगणः | = | १३११ |
| | | ×१२ |
| | | १५७३२ |
| गतमासः | = | +० |
| सौरमासगणः | = | १५७३२ |

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



सौरमासगणः = १५७३२
× ३०
४७१९६०
गततिथयः + २९
सौरदिवसाः = ४७१९८९
+ ५
प्रथमः = ४७१९९४

४७१९९४ प्रथमः
—३१ द्वितीयः
९७६)४७१९६३(४८३ अधिमासाः
३९०४
८१५६
७८०८
३४८३
२९२८
५५५

१४९४५)४७१९९४(३१ द्वितीयः
४४८३५
२३६४४
१४९४५
८६९९

४८३ अधिमासाः
× ३०
१४४९० अधिदिवसाः

सौरदिवसाः = ४७१९८९
अधिदिवसाः = + १४४९०
तिथिगणः = ४८६४७९
× ११
५३५१२६९
+ ४९७
तृतीयः = ५३५१७६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



५३५१७६६ तृतीयः — ४७ चतुर्थः

७०३)५३५१७१६(७६१२ अवमाऽहाः

४९२१

४३०७

४२१८

८६१

७०३

१८८६

१४०६

४८३

१११५७३)५३५१७६६(४७

४४६२६२ चतुर्थः

८८८८४६

७८१०११

१०७८३५

तिथिगणः = ४८६४७६

अवमाऽहाः = —७६१२

अहर्गणः = ४७८८६७

७)४७८८६७(६८४०६

४२

५८

५६

२८ ६७

२८ ६३

६७ ४ शेषः

४ शेषे गुरुवारः

| | अहर्गणः |
|---|---|
| सुमतितन्त्रात् | १८५४४३२ |
| खण्डखाद्यकात् | ४७८८६७ |
| अन्तरम् | १३७५५६५ |

अत्रोपपत्तिः ।

उपरि निर्दिष्टः सुमतितन्त्रोक्तोऽहर्गणसाधनप्रकारः खण्ड-खाद्यकोक्तोऽयम् अहर्गणसाधनप्रकारश्च समानरूपौ स्तः । सुमतितन्त्रोक्तप्रकारस्य पूर्वदर्शितयोपपत्त्यैवाऽस्य खण्डखाद्यकोक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



प्रकारस्याऽप्युपपत्तिर् भवति । अतः केवलम् अधिमासाऽऽनयने-ऽवमदिनाऽऽनयने च निर्दिष्टयोः क्षेपकयोर् एवोपपादनं क्रियते ।

खण्डखाद्यकस्य प्रारम्भदिवसेऽहर्गणसाधने

प्रथमः = १३५५७६०

द्वितीयः = ६०$\frac{१०७१०}{२९६२५}$ (शेषस्याऽपरित्यागे)

१३५५७६०

—६०$\frac{१०७१०}{२९६२५}$

६७६)१३५५६६६$\frac{२३३५}{२९६२५}$(

———

५$\frac{२३३५}{२९६२५}$ अधिशेषम् उत्पद्यते

तृतीयः = १५३७१७३०

चतुर्थः = १३७$\frac{६२२९}{२९६२५}$ (शेषस्याऽपरित्यागे)

१५३७१७३०

—१३७$\frac{६२२९}{२९६२५}$

७०३)१५३७१५६२$\frac{२५३४४}{२९६२५}$(

———

४६७$\frac{२५३४४}{२९६२५}$ अवमशेषम् उत्पद्यते

५$\frac{२३३५}{२९६२५}$ अधिशेषम्, ४६७$\frac{२५३४४}{२९६२५}$ अवमशेषम् अत्राऽर्धाऽधिके रूपं ग्राह्यम् अर्धाऽल्पे रूपं त्याज्यम् इति नियमम् अनुसृत्य ब्रह्मगुप्तेन ५ अधिशेषम्, ४६७ अवमशेषम् इति स्वीकृत्य ते शेषे क्षेपकत्वेन गृहीते ।

खण्डखाद्यकस्य वैशिष्ट्यम् अधिकृत्याऽन्यस्मिन् निबन्धे विचारयिष्यामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# संक्षिप्तायाः काशिकायाः
# श्चुत्वष्टुत्वप्रकरणम्

भोलानाथः पौडेलः

स्तोः श्चुना श्चुः ।।४०।।

सकारतवर्गयोः शकारचवर्गाभ्यां सन्निपाते शकारचवर्गावादेशौ भवतः । स्तोः श्चुनेति यथासंख्यमत्र नेष्यते । सकारस्य शकारेण चवर्गेण द्वाभ्यामपि सन्निपाते शकारो भवति । तवर्गस्याऽपि च शकारेण चवर्गेण च सन्निपाते चवर्गो भवति । आदेशे तु यथासंख्यमिष्यते सकारस्य शकारस् तवर्गस्य चवर्ग इति । सकारस्य शकारेण सन्निपाते – वृक्षश्शेते । प्लक्षश्शेते । तस्यैव चवर्गेण–वृक्षश्चिनोति । प्लक्षश्चिनोति । वृक्षश्छादयति । प्लक्षश्छादयति । तवर्गस्य शकारेण– अग्निचिच्छेते । सोमसुच्छेते । तस्यैव चवर्गेण– अग्निचिच्चिनोति । सोमसुच्चिनोति । अग्निचिच्छादयति । सोमसुच्छादयति । अग्निचिज्जयति । सोमसुज्जयति । अग्निचिञ्झकारः । सोमसुञ्झकारः । अग्निचिञ्ञकारः । सोमसुञ्ञकारः । मस्जेः- मज्जति । भ्रस्जेः- भृज्जति । यजेः – यज्ञः । याचेः- याच्ञा ।

न तज्जलं यन्न सुचारुपङ्कजम् । भ. २।१६
व्याधं व्याधममूढौ तौ यमसाच्चक्रतुर्द्विषौ ।। भ. ५।३
अन्तिकेऽपि स्थिता पत्युश्छलेनान्यं निरीक्षते ।। भ. ५।१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



यज्जीवामस्तया विना ॥ भ. ६।१४
सद्यः कथं वियोगश्च गद्यमेतत् त्वया मम ॥ भ. ६।४७
पापचर्यां मुनेः शापाज्जातः । भ. ६।४८
फलैर्नानारसैश्चित्रैः स्वादुशीतैश्च वारिभिः ॥ भ.७।६४
अनंसीच्चरणौ तस्य मन्दिरादिन्द्रजिद् व्रजन् । भ. ६।५१
प्रतिप्रियं सोऽभ्यगमच्चिकीर्षुः॥ भ. १२।४८
मन्युश्चास्य समापिप्ये । भ. १४।६२
नेशुश्चित्रा निशाचराः । भ. १४।११२
निरगाच्च द्रुतं पुरः । भ. १५।२१
आख्यच्चैनं विभीषणः । भ. १५।३६
योद्धुं सोऽप्यरुषच्छत्रोरैरिरच्च महाद्रुमम् । भ. १५।५२
अग्रहीच्चाऽयुरन्येषाम् । भ. १५।६३
अधावीच्चारिसंमुखम् । भ. १५।६७
निरयासीच्च संक्रुद्धः प्राचिंचच्च स्वयम्भुवम् ॥ भ. १५।६५
तत्रेषज्जाम्बवान् प्राणीदुदमीलीच्च लोचने । भ. १५।१०२
संभावितानि नैतानि कदाचित् केनचिज्जने ॥ भ. १६।१८
पर्यष्वजत सौमित्रिं मूर्ध्न्यजिघ्रच्च राघवः ॥ भ. १७।४७
आस्कन्दल्लक्ष्मणं बाणैरत्यक्रामच्च तं द्रुतम् ।
राममभ्यद्रवज्जिष्णुरस्कुनाच्चेषुवृष्टिभिः ॥ भ. १७।८
न पृथग्जनवज्जातु प्रमुह्येत् पण्डितो जनः ॥ भ. १६।१७

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः । अ. १। १।२०
स्याच्चैत्रे चैत्रिको मधुः । अ. १।४।१५
नीवृज्जनपदः । अ. २।१।८
स्याच्चयो वप्रमस्त्रियाम् । अ. २।२।३
मठश्छात्राऽदिनिलयः । अ.२। २।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



कोकश्चक्रश्चक्रवाको रथाङ्गाऽह्वयनामकः । अ. २।५।२२
गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते । अ. २।५।४३
स्वस्त्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः । अ.२। ६।३२
अमांसो दुर्बलश्छातः । अ. २।६।४४
ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः । अ. २।७।२५
स्वाध्यायः स्याज्जपः । अ. २।७।४७
हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् । अ. २।८।३३
द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले । अ.२।६।१६
पादूकृच्चर्मकारः स्यात् । अ. २।१०।७
स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् । अ. ३।१।३६
जन्यः स्याज्जनवादेऽपि । अ. ३।३।१५६
असाकल्ये तु चिच्चन । अ. ३।४। ३

अव्ययीभावश्च । पा.१।१।४१
ङिच्च । पा. १।१। ५३
हलन्ताच्च । पा. १। २।१०
उश्च । पा. १।२। १२
स्थाध्वोरिच्च । पा.१।२। १७
स्त्री पुंवच्च । पा. १। २। ६६
व्यक्तवाचां समुच्चारणे । पा. १।३।४८
दाणश्च सा चेच्चतुर्थ्यर्थे । पा.१।३। ५५
णिचश्च । पा. १।३।७४
अनुपसर्गाज्ज्ञः । पा. १।३।७६
उपाच्च । पा.१।३।८४
निगरणचलनार्थेभ्यश्च । पा. १।३।८७
षष्ठीयुक्तश्छन्दसि वा । पा. १। ४।६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अनुप्रतिगृणश्च । पा. १।४।४१
अभिनिविशश्च । पा. १।४।४७
तृतीया च होश्छन्दसि । पा. २।३।३
तुमर्थाच्च भाववचनात् । पा. २।३।१५
णेश्छन्दसि । पा. ३।२।१३७
आशंसायां भूतवच्च । पा. ३।३।१३२
सेर्ह्यपिच्च । पा.३।४।८७
कद्रुकमण्डल्वोश्छन्दसि । पा. ४। १। ७१
आवटयाच्च । पा. ४।१।७५
पितृष्वसुश्छण् । पा. ४।१।१३२
मातृष्वसुश्च । पा.४।१ १३४
स्वसुश्छः । पा. ४।१।१४३
भ्रातुर्व्यच्च । पा. ४।१।१४४
फेश्छ च । पा. ४।१।१४६
द्वन्द्वाच्छः । पा. ४।२।६
उत्करादिभ्यश्छः । पा. ४।२।६०
वृद्धाच्छः । पा. ४।२।११४
गर्त्तोत्तरपदाच्छः । पा. ४।२।१३७
जिह्वामूलाङ्गुलेश्छः । पा. ४।३।६२
तित्तिरिवरतन्तुखण्डिकोखाच्छण् । पा. ४।३।१०२
आयुधाच्छ च । पा ४।४।१४
ढश्छन्दसि । पा. ४।४।१०६
प्राक् क्रीताच्छः । पा. ५।१।१
कम्बलाच्च संज्ञायाम् । पा. ५।१।३
उपसर्गाच्छन्दसि धात्वर्थे । पा. ५।१।११८
प्राणभृज्जातिवयोवचनोद्गात्राऽदिभ्योऽञ् । पा. ५।१।१२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



हस्ताज्जातौ । पा. ५।२।१३३
कुशाग्राच्छः । पा. ५।३।१०५
दामन्यादित्रिगर्त्तषष्ठाच्छः । पा. ५।३।११६
जात्यन्ताच्छ बन्धुनि । पा. ५।४।६
रोगाच्चापनयने । पा. ५।४।४६
समयाच्च यापनायाम् । पा. ५।४।६०
खिदेश्छन्दसि । पा. ६।१।५२
शेश्छन्दसि बहुलम् । पा. ६।१।७०
अन्तादिवच्च । पा. ६।१।८५
दीर्घाज्जसि च । पा. ६।१।१०५
संप्रसारणाच्च । पा. ६।१।१०८
आङोऽनुनासिकश्छन्दसि । पा. ६।१।१२६
परादिश्छन्दसि बहुलम् । पा. ६।२।१६६
जश्शसोः शिः । पा. ७।१।२०
नेतराच्छन्दसि । पा. ७।१।२६
आज्जसेरसुक् । पा. ७।१।५०
सुसर्वार्द्धाज्जनपदस्य । पा. ७।३।१२
अच्च घेः । पा. ७।३।११६
लोपः पिबतेरीच्चाभ्यासस्य । पा. ७।४।४
नश्छव्यप्रशान् । पा. ८।३।७

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव । र. १।११
स बभूवोपजीविनाम् । अधृष्यश्चाभिगम्यश्च । र. १।१६
क्रमाच्चतस्रश्चतुरर्णवोपमाः । ततार विद्याः । र. ३।३०
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् । र. ४।१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



विपिनानि प्रकाशानि शक्तिमत्वाच्चकार सः । र. ४।३१
पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदान्जयो । र. ४।३४
प्रत्युज्जगामातिथिमातिथेयः । र. ५।२
तच्चोदितश्च तमनुद्धृतशल्यमेव
पित्रोः सकाशमवसन्नदृशोर्निनाय । र. ६।७७
बीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत । र. ११।८
उच्चचाल बलभित्सखो वशी । र. ११।५१
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम् । र. १२।२७
लङ्कास्त्रीणां पुनश्चक्रे विलापाऽचार्यकं शरैः । र. १२।७८
यतो रजः पार्थिवमुज्जिहीते । र. १३।६४
महीपतेः शासनमुज्जगार । र. १४।५३
अनन्यजानेः सैवाऽसीद् यस्माज्जाया हिरण्मयी । र. १५।६१
तस्याऽभवज्जङ्गमराजधानी । र. १६।२६
उच्चैः शिरस्त्वाज्जितपारियात्रं
लक्ष्मीः सिषेवे किल पारियात्रम् । र. १८।१६

अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते ॥ ह. १।६
देहीति मार्गणशतैश्च ददाति दुःखम् । ह. २।३
आयातः कथमप्ययं स्मृतिपथं शून्यीभवच्चेतसाम् । ह. २।४
न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम् ॥ ह. ३।२
उच्चित्योच्चित्य भुवि प्रहितनिगूढात्मदूतनीतानाम् ।
विजिगीषुरिव कृतान्तः शूराणां संग्रहं कुरुते ॥ ह. ६।१
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य वीरस्य । ह. ७।१
विद्वज्जनसम्पर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः ।
कस्य न सुखाय महते भवति महारत्नलाभश्च ॥ ह. ८।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



ष्टुना ष्टुः ८।४।४१

स्तोरिति वर्तते। सकारतवर्गयोः षकारटवर्गाभ्यां सन्निपाते षकारटवर्गावादेशौ भवतः। षकारेण सकारस्य-वृक्षष्षण्डे। प्लक्षष्षण्डे। तस्यैव टवर्गेण-वृक्षष्टीकते। प्लक्षष्टीकते। वृक्षष्ठकारः। प्लक्षष्ठकारः। तवर्गस्य षकारेण-पेष्टा। पेष्टुम्। पेष्टव्यम्। कृषीष्ट। कृषीष्ठाः। तस्यैव टवर्गेण-अग्निचिट्टीकते। सोमसुट्टीकते। अग्निचिट्ठकारः। सोमसुट्ठकारः। अग्निचिड्ढीनः। सोमसुड्ढीनः। अग्निचिड्ढौकते। सोमसुड्ढौकते। अग्निचिण्णकारः। सोमसुण्णकारः। अतृट्-अट्टति। अद्ड्-अड्डति॥

ऐक्षिष्ट पुम्भिः प्रचितं स गोष्ठम्॥ भ. २।१४
पर्यशाप्सीद् दिविष्ठाऽसौ सन्दर्श्यं भयदं वपुः। भ. ४।३३
भूम्निष्ठः खविचारिणः। रामो यज्ञद्रुहो हन्ति। भ. ५। १३
प्रष्टव्यं पृच्छतस्तस्य कथनीयमवोचत। भ. ६।४६
शक्यो द्रष्टुं कथं रिपुः। भ. ६।४७
अवग्राहे यथा वृष्टिं प्रार्थयन्ते कृषीवलाः। भ. ७।४८
जगादाद्रिर्विजेषीष्ठा मयि विश्रम्य वैरिणम्। भ. ८। ६
तं दृष्ट्वाऽचिन्तयत् सीता। भ. ८।१०४
तस्मिन् वदति रुष्टोऽपि नाकार्षं देवि विक्रमम्। भ. ८।११३
वनं प्रभञ्जनसुतो नादयिष्ट विनाशयन्॥ भ. ६।२४
यन् न व्यसहतेन्द्रोऽपि कपिः पर्यषहिष्ट तत्। भ. ६।७३
दृष्ट्वा सुषुप्तं राजेन्द्रं प्रविष्टः प्रसदावनम्॥ भ. ६।८२
दृष्टा मया रामपतिः प्रमन्युः। भ. १०। ३६
हीना महान्तश्च समत्वमीयुर्द्वास्थैरवज्ञापरुषाक्षिदृष्टाः॥ भ. ११।४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



उपेक्षणीयैव परस्य वृद्धिः प्रनष्टनीतेरजितेन्द्रियस्य । भ. ।१२।२७
ततस्तुष्टाः निशाचराः ॥ भ. १४। ५३
अद्राष्टां तं रघुव्याघ्रौ आख्यच्चैनं विभीषणः ।
एष व्यजेष्ट देवेन्द्रं नाशङ्किष्ट विवस्वतः ॥ भ. १५ ।३६
तमादाय पलायिष्ट व्यरोचिष्ट च राक्षस : ॥ भ. १५।५६
तमभ्यासिष्ट दीप्राग्रममोदिष्ट च रावणिः । भ. १५।६७
विनष्टं रक्षसां कुलम् ॥ भ. १६।१४
क्रुष्टं हाहेति चाश्रृण्वन् । भ. १७।६५
विपाकोऽयं दशग्रीव! संदृष्टोऽनागतो मया । भ. १८।३
द्वेष्टि प्रायो गुणेभ्यो यत् । भ. १८।६
सहस्रचक्षुषं रामो निनंसुः परिदृष्टवान् । भ. २१।१६

स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः । अ. १।१। १७
मिथ्यादृष्टिर्नास्तिकता । अ. १।५।४,
अदृष्टिः स्यादसौम्येऽक्षिण । अ. १।८।३७
त्रिषु नष्टतिरोहितौ । अ. २।८।११२
सोत्यं क्रुष्टं च हल्यव्रत् । अ. २।६।८
दृष्टिर्ज्ञानेऽक्षिण दर्शने । अ. ३।३।३८

ष्णान्ताः षट् । पा. १।१।२४
गापोष्टक् । पा. ३।२।८
चरेष्टः । पा. ३।२।१६
लक्षणे जायापत्योष्टक् । पा. ३।२।५२
अजाद्यतष्टाप् । पा. ४।१।४
अपूर्वपदादन्यतरस्यां यड्ढकञौ । पा. ४।१। १४०
दुष्कुलाड्ढक् । पा. ४।१।१४२
रेवत्यादिभ्यष्ठक् । पा. ४। १।१४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



वृद्धाट्ठक् सौवीरेषु बहुलम्। पा. ४।१।१४८
लाक्षारोचनाशकलकर्दमाट्ठक्। पा. ४।२।२
वामदेवाड्ड्यड्ड्यौ। पा. ४।२।९
दण्ड्यनड्ठक्। पा. ४।२।१८
क्षीराड्ढञ्। पा. ४।२।२०
आग्रहायण्यश्वत्थाट्ठक्। पा. ४।२।२२
सोमाट्ट्यण्। पा. ४।२।३०
महाराजप्रोष्ठपदाट्ठञ्। पा. ४।२।३५
अचित्तहस्तिधेनोष्ठक्। पा. ४।२।४७
क्रतूक्थादिसूत्रान्ताट्ठक्। पा. ४।२।६०
वसन्तादिभ्यष्ठक्। पा. ४।२।६३
नडशादाड्ड्वलच्। पा. ४।२।८८
कन्थायाष्ठक्। पा. ४।२।१०२
भवतष्ठक्छसौ। पा. ४।२।११५
काश्यादिभ्यष्ठञ्ञ्यिठौ। पा. ४।२।११६
दिक्पूर्वपदाट्ठञ्च। पा. ४।३।६
कालाट्ठञ्। पा. ४।३।११
वर्षाभ्यष्ठक्। पा. ४।३।१८
उपजानूपकर्णोपनिवेष्ठक्। पा.४ ३।४०
कोशाड्ढञ्। पा. ४।३।४२
अन्तःपूर्वपदाट्ठञ्। पा. ४।३।६०
बह्वचोऽन्तोदात्ताट्ठञ्। पा. ४।३।६७
द्व्यजद्ब्राह्मणकर्ग्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्। पा. ४।३।७२
ऋतष्ठञ्। पा. ४। ३। ७८
तुदीशलातुरवर्मतीकूचवाराड्ढक्छ्ण्ढञ्यकः। पा. ४।३।९४
अचित्तादेशकालाट्ठक्। पा. ४।३।९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



महाराजाट्ठञ् । पा. ४।३।९७
हलसीराट्ठक् । पा. ४।३।१२४
शम्याष्टलञ् । पा. ४।३।१४२
प्राग्वहतेष्ठक् । पा. ४।४।१
गोपुच्छाट्ठञ् । पा. ४।४। ६
नौद्व्यचष्ठन् । पा. ४।४।७
श्वगणाट्टञ्च । पा. ४।४।११
वस्नक्रयविक्रयाट्ठन् । पा. ४।४।१३
आक्रन्दाट्टञ्च । पा. ४।४।३८
लवणाट्ठञ् । पा. ४।४।५२
परश्वधाट्ठञ् । पा. ४।४।५८
बह्वचपूर्वपदाट्ठच् । पा. ४।४।६४
श्राणामांसौदनाट्टिठन् । पा. ४।४।६७
अगारान्ताट्ठन् । पा ४।४।७०
धुरो यड्ढकौ । पा. ४।४।७७
कथादिभ्यष्ठक् । पा. ४। ४।१०२
गुडादिभ्यष्ठञ् । पा. ४।४। १०३
स्रोतसो विभाषा ड्यड्डयौ । पा. ४।४।११३
आर्हादगोपुच्छपरिमाणाट्ठक् । पा. ५।१। १९
कंसाट्टिठन् । पा. ५।१।२५
लोकसर्वलोकाट्ठञ् । पा. ५। १।४४
पूरणार्द्धाट्ठन् । पा. ५।१। ४८
द्विगोष्ठंश्च । पा. ५। १।५४
तदस्मिन्नधिकमिति दशान्ताड्डः । पा. ५।१। ४५
उदराट्ठगाद्यूने । पा. ५।२।६७
अङ्गुल्यादिभ्यष्ठक् । पा. ५।३।१०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



एकशालायाष्ठजन्यतरस्याम् । पा. ५।३।१०६
वृकाट्टेण्यण् । पा. ५।३।११५
विनयादिभ्यष्ठक् । पा. ५।४।३४
राजाहस्सखिभ्यष्ठक् । पा. ५।४।९१
अह्नष्टखोरेव । पा. ६।४।१४५
प्रणवष्टेः । पा. ८।२।८६
न पदान्ताट्टोरनाम् । पा. ८।४।४२

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः । र. १।१८
संविष्टः कुशशयने निशां निनाय । र. १।९५
शशाम वृष्टयाऽपि विना दवाग्निः । र. ७।१४
निवर्तयामास नृपस्य दृष्टिम् ॥ र. २। २८
ततः परं तेन मखाय यज्वना तुरङ्गमुत्सृष्टमनर्गलं पुनः । र. ३।३६
आरण्यकोपात्तफलप्रसूतिःस्तम्बेन नीवार इवावशिष्टः ॥ र. ५।१५
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थौ चकमे कुबेरात् ॥ र ५।२६
भोजेन दूतो रघवे विसृष्टः ॥ र. ५।३६
येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम् ॥ र. ६।४१
इतश्चकोराक्षि ! विलोकयेति
पूर्वानुशिष्टां निजगाद भोज्याम् ॥ र ६।५६
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ र. १०।१६
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥ र. १०।६८
प्रीतिरोधमसहिष्ट सा पुरी । र. ११।५२
परस्परशरव्राताः पुष्पवृष्टिं न सेहिरे ॥ र. १२।९४
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रुसमं विसृष्टम् ॥ र. १३।२६
त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् । र. १४। ३५
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥ र १५। ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



## नपदान्ताट् टोरनाम् ८।४।४२

पदान्ताट् टवर्गादुत्तरस्य स्तोः ष्टुत्वं न भवति नामित्येतद् वर्जयित्वा। श्वलिट् साये। मधुलिट् तरति। पदान्तादिति किम्? ईड् स्तुतौ-ईट्टे। टोरिति किम्? सर्पिष्टमम्। अनामिति किम्? षण्णाम्॥

षट्त्रिंशद्धरिकोटयश्च निवव्रुर्वानराधिपम्॥ भ. १४।२६

जम्भभेदी हरिहयः स्वाराण् नमुचिसूदनः। अ. १।१।४३
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः। अ. १।४।१६
विपाशा तु विपाट् स्त्रियाम्। अ. १।१०। ३३
षट् तु त्रिषु। अ. २।७।३३
न्याय्यं च त्रिषु षट् संप्रधारणा तु समर्थनम्। अ. २।८।२५
उदन्या तु पिपासा तृट् तर्षः। अ. २। ६।५५
स्वाहादेवहविर्दाने श्रौषड् वौषड्वषट् स्वधा। अ. ३।४।८
षट्संख्यकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्। अ. ३।४।८

चिण् ते पदः। पा. ३।१।६०
इण्नशजिसर्तिभ्यः क्वरप्॥ पा. ३।२।१६३
सुट् तिथोः। पा. ३।४।१०७
न षट्स्वस्रादिभ्यः। पा. ४। १।१०
षट्त्रिचतुर्भ्यो हलादिः। पा. ६।१।१७६
नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्याः। पा. ६। ३।७५
इण् निष्ठायाम्। पा. ७।२।४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमन-
यच्छपश्यर्च्छधौशीयसीदाः । पा. ७।३।७८
तस्मान्नुड् द्विहलः । पा. ७।४।७१
गत्यर्थलोटा लृण् न चेत् कारकं सर्वान्यत् । पा. ८।१।५१
ङमो ह्रस्वादचि ङमुण् नित्यम् । पा. ८।३।३२

## तोः षि ८।४।४३

नेति वर्त्तते । तवर्गस्य षकारे यदुक्तं, तन्न भवति । अग्निचित्
षण्डे । भवान् षण्डे । महान् षण्डे ॥

पौरोडाशपुरोडाशात् ष्ठन् । पा. ४।३।७०
आकर्षात् ष्ठल् । पा. ४। ४। ६
कुसीददशैकादशात् ष्ठन्ष्ठचौ । पा. ४।४। ३१
आवसथात् ष्ठल् । पा. ४। ४।७४
पात्रात् ष्ठन् । पा. ५। १। ४६
पङ्क्तिविंशतित्रिंशत्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवति-
शतम् । पा. ५।१।५६
बहुव्रीहौ शक्थ्यदृणोः स्वाङ्गात् षच् । पा. ५।४।११३
अतः सोऽभ्यन्तरान् नित्यान् षट्पूर्वानजयद् रिपून् ॥ र. १७। ४५

## शात् ८।४।४४

तोरिति वर्त्तते । शकारादुत्तरस्य तवर्गस्य यदुक्तं तन्न भवति ।
प्रश्नः । विश्नः ॥
अश्नन्ति रामाद् रक्षांसि बिभ्यत्यश्नुवते दिशः ॥ भ. ५।१४
अश्नीत-पिबतीयन्ती । भ. ५।६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



सत्वानजस्रं घोरेण बलाऽपकर्षमश्नता ।
क्षुध्यता जगृहाते तौ रक्षसा दीर्घबाहुना ॥ भ. ६।४४
मूर्खाऽतुरः पथ्यकटूननश्नन्
यत् साऽमयोऽसौ भिषजां न दोषः ॥ भ. १२।८२
क्षुच्चास्याऽवृधदश्नतः । भ. १५।२६
प्राश्नन्नथ सुराऽमिषम् । भ. १७।३
तद् व्याश्नुत दिशो दश । भ. १७।६०
व्यश्नुते स्म ततः शोकः । भ. १८।१
दिषो व्यश्नुवते दृप्ताः । भ. १८।२६
नेदानीं शक्रयक्षेन्द्रौ बिभीतो न दरिद्रितः ।
न गर्वं जहितो दृप्तौ न क्लिश्नीतो दशानन ! । भ. १८।३१

प्रश्नोऽनुयोगः पृच्छा च । अ. १।६।१०
पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका । अ. २।४।६२
विप्रश्निका त्वीक्षणिका दैवज्ञा । अ. २।६।२०
पृश्निरल्पतनौ । अ. २।६।४८
शिश्नो मेढ्रं मेहनशेफसी । अ. २।६।७६
स्वित् प्रश्ने च वितर्के च । अ. ३।३।२४२
मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ । अ. ३।३।२४७
प्रश्नावधारणाऽनुज्ञाऽनुनयाऽमन्त्रणे ननु । अ. ३।३।२४८
गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि । अ. ३।३।२४९
हुं वितर्के परिप्रश्ने । अ. ३।३।२५२
ऊँ प्रश्ने । अ. ३। ४।१८

राधीक्ष्योर्यस्य विप्रश्नः । पा. १।४।३६
कतरकतमौ जातिपरिप्रश्ने । पा. २।१।६३
स्वादिभ्यः श्नुः । पा. ३।१।७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



रुधादिभ्यः श्नम् । पा. ३।१।७८

क्रयादिभ्यः श्ना । पा. ३।१।८१

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च । पा. ३।१।८२

हलः श्नः शानज्झौ । पा. ३।१।८३

प्रश्ने चासन्नकाले । पा. ३।२।११७

विभाषाऽऽख्यानपरिप्रश्नयोरिञ्च । पा. ३।३।११०

विधिनिमन्त्रणाऽमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । पा. ३ ३।१६१

श्नान्नलोपः । पा. ६।४।२३

अचिश्नुधातुभ्रुवां योरियङुवङौ । पा. ६। ४।७७

हुश्नुवोः सार्वधातुके । पाः ६। ४।८७

श्नसोरल्लोपः । पा. ६।४।१११

भ्राऽभ्यस्तयोरातः । पा. पा.६।४।११२

अश्नोतेश्च । पा. ७।४। ७२

सत्यं प्रश्ने । पा. ८।१।३२

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिसिद्धम् । पा. ८।१।४४

अनन्त्यस्यापि प्रश्नाऽख्यानयोः । पा. ८।२। १०५

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते । र. १०।१७

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः
भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः ॥ र. १०।३४

घ्रात्वा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा ॥ र. १३।३७

दिव्यस्तूर्यध्वनिरुदचरद् व्यश्नुवानो दिगन्तान् । र. १६।८७

अनश्नुवानेन युगोपमानमबद्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्गत्सरुणाऽपि चासीद् रक्षावती तस्य भुजेन भूमिः ॥
र. १८।४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# राज्ञो रणबहादुरशाहस्य द्वे पत्रे

रुक्मनाथः पौडेलः

श्रीदिनेशराजपन्तस्य सहायको भूत्वा गवेषणां कुर्वाणोऽहं संस्कृत-भाषानिबद्धानि कतिपयानि पत्राणि प्राप्नवम् । तेषु द्वे पत्रे अत्र प्रकाशिते स्तः। एते पत्रे पररष्ट्रमन्त्रालये विद्येते । उभे अपि पत्रे स्वर्णमयतिलकाङ्किते स्तः । अनयोः प्रथमस्य पत्रस्य दैर्घ्यमष्टादशाङ्गुलं विस्तृतिश्च दशाङ्गुला वर्तते । अस्मिन् उपदापरिचयपत्रं च संलग्नं वर्तते यस्य दैर्घ्यं किञ्चिदधिक-पञ्चाङ्गुलं विस्तृतिश्च आसन्नसार्धत्र्याङ्गुला वर्तते । द्वितीयस्य पत्रस्य दैर्घ्यं षोडशाङ्गुलं विस्तृतिश्च दशाङ्गुला वर्तते । अस्मिन्नपि उपदापरिचयपत्रं संलग्नं वर्तते यस्य दैर्घ्यं दशाङ्गुलं विस्तृतिश्च पञ्चाङ्गुला वर्तते ।

[प्रथमं पत्रम्]

श्रीदुर्गासहाय १

(१) स्वस्ति श्रीमदिन्द्रप्रस्थसन्निधानभूतकूर्माचलोदित-
मार्त्तण्डमण्डलविराज-
(२) मानप्रतापानलभस्मीभूताऽरिसारभूतसंपत्तिसंप्रदानी-
कृतार्थिजनसंतोष-
(३) सोमस्वच्छीकृतदिक्चक्रमण्डलेषु श्रीमन्महाराजाधि-
राजश्रीश्रीश्रीमत्कूर्मा-
(४) चलाऽधीश्वरेषु सदा समरविजयिषु स्वस्ति श्रीगिरि-
राजचक्रचूडामणिनरना-
(५) रायणेत्यादिविविधविरुदावलिविराजमानमानोन्नत-
श्रीमन्महाराजाधिरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



(६) जश्रीश्रीश्रीमहाराजेरणबहादूरशाहबहादूरसम्सेर्जङ-
देवानां सदा समर-
(७) विजयिनां प्रेमालिङ्गनपूर्विकेयं पत्री. भव्यमत्र तत्राप्य-
हर्निशं भावत्कं भा-
(८) वुकमाशास्महे. वाक्प्रपञ्चेन वक्तव्यं तु यदा नेपाल-
देशस्याक्रमणाय अस्म-
(९) त्सैन्यानि समुत्तस्थुस्तदा गोर्षाकूर्माचलान्तर्वर्त्तिपरि-
पन्थिक्षुद्रभूपैर्विघ्नानि
(१०) कति न संपादितानि तथाप्यस्मत्पितामहचरणा एत-
द्देशं किराताख्यदेशं
(११) च जगृहुस्तदनंतरं च ते विधिवशाद्विवंगतास्ततस्तेषां
परिपन्थिनां वैगुण्यमा-
(१२) कर्ण्य तदुत्कर्षासहमानैरस्माभिरपि यदा सैन्यानि
पश्चिमाभिमुखीकृतानि
(१३) तदा भेरीपर्यन्तवर्तिनो भूपाः सर्वे पलायिताः कतिचि-
च्चावशिष्टाः तेपि च
(१४) मद्वशवर्त्तिनः सन्तीत्येतद्वृत्तान्तमत्रत्यम्. तत्रापि च
गढादिदेशानाक्रम्य
(१५) कूर्माचलेश्वरो वरीवर्तीति लोकैर्यशो गीयते. अतः परं
गोर्षाकूर्माचलयोरै-
(१६) कमत्यान्महाकार्यान्तराणि स्युरित्यस्मत्संमतिः प्रति-
भातीत्यलम् . सकलै-
(१७) तद्देशलाभोत्सवरूप – ष्णिगेका पुष्पाणि च भवन्निकटे
समुल्लसन्तु. वि-
(१८) स्तरस्तु कनकनिधि त्रिपाठी वक्ष्यतीत्यलं विज्ञवरेषु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



चैत्रकृष्णैकादश्यां गु–

(१९) रुवासरे कान्तिपुरतः शूभं भूयात्–

[उपदापरिचयपत्रम्]

श्री

| | |
|---|---|
| जरिको पगरि | १ |
| सर्वांद पगरि | १ |
| शुनका मोहर | १२ |

[द्वितीयं पत्रम्]

श्रीदुर्गा जयति ।

(१) स्वस्ति श्रीधृतिमल्लोकपालोपमभूमिपालावली-

प्रभुत्वप्रतापप्राखर्य्यखर्वीकृतिच-

(२) मत्कृतिविराजमानार्वीकपारशीकोर्वीशविस्मापनस्व-

धीधृतिसौर्यसंभूताद्भुतप्रखरप्रतापा-

(३) तपसंतापितातपत्रशालिप्राच्यावाच्यप्रतीच्यभूपालि-

लोकोत्तरबुद्धिविभवविस्मापिता-

(४) त्मसात्कृतावनिमंडलेशमंडनीभवन्नीतिनिवहनिर्वा-

हितप्रकृतिवर्गनिसर्गगौरनर–

(५) वरेषु श्रीश्रीश्रीमिस्तरअंगरेजसाहेबमहाशयेषु लि.

स्वस्ति श्रीगिरिराजचक्रचूडा–

(६) मणिनरनारायणेत्यादिविविधविरुदावलीविराजमान-

मानोन्नतश्रीमन्महाराजा–

(७) धिराजश्रीश्रीश्रीमहाराजेरणबहादूरसाहबहादूर-

सम्सेरर्ज ङ्गदेवानाम् सदा समरवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



(८) जयिनाम् सलामेत्याख्याः समुल्लसन्तु. समत्र तत्रत्य-
मर्हादवं तदेधमानमाशास्म–

(९) हे. उदंतस्तु श्रवणानन्ददा भवदीयकीर्तिरुज्वलयति
चिरादस्मत्स्वान्तमतोऽभिन्न–

(१०) मिच्छामो वयमेतदभिप्रायतोयं लेखो यादृगंगरेजेश-
निकेतने परंपरैक्यतास्माकं

(११) तथैवात्र विधेया श्रीमद्भिः विशेषवाग्विलासोस्मदीया
बदिर्लासिहेमांबकसयोर्वदन–

(१२) तः प्रकटीभविष्यतीत्यलमतिविस्तरेण विज्ञेषु. विक्रम-
संवत् १८४४ ज्येष्टमेचकचतु–

(१३) र्दश्यां बुधेहनि स्थितिः कांतिपुर्य्यां मंगलं भूयान्नि-
रंतम्–

[उपदापरिचयपत्रम्]

| | |
|---|---|
| स्वर्णमुद्रे | २ |
| स्वर्णार्द्ध मुद्राः | ५ |
| स्वर्णपादमुद्राः | ५ |
| स्वर्णानिकद्वद्धानि | ५ |
| स्वर्णानिकाः | ५ |
| स्वर्णानिकार्द्ध मुद्राः | ५ |
| पार्वत्यौ शिखिनौ | २ |
| तदबला च | १ |
| मोहनपक्षिद्वंद्वं | २ |
| कस्तूरिमृगसर्वांगे | २ |

वस्तून्येतानि भवन्निकटे समुल्लसन्तुतराम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जि. का. भ. द. नं. ४।०३५/३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu